# संस्कृतवार्ता:

दिनाङ्क :- 22.05.2025 सायम् :- 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना सिंदूराभियानस्य सफलतायै भारतीय-सशस्त्र-बलानां प्रशंसा विहाय प्रोक्तं यत् तेषां पराक्रमेण पाकिस्तानः पराजयमुखम् अपश्यत् ।
- श्रीमोदी अद्य राजस्थानस्य बीकानेरक्षेत्रे षड्विंशति-सहस्र-कोटिरुप्यकाणां विभिन्न-विकास-परियोजनानां शिलान्यासम् उद्घाटनं च कृतवान् ।\
- भारतेन अद्य स्वकीयः सङ्कल्पः पुनरुच्चारितः अस्ति यत् भारत-पाकिस्तानयोः मध्ये कापि वार्ता द्विपक्षीया भवितव्या ।
- ऋतु-विज्ञान-विभागः आगामिषु द्वि-त्रितय-दिवसेषु दक्षिण-कोंकण-गोवा-महाराष्ट्र-तटीय-कर्नाटक-क्षेत्रेषु अतिभीषणवृष्ट्याः संचेतनां प्रकाशितवान्
- आई-पी-एल् इति क्रिकेटद्वन्द्वे अद्य अहमदाबाद-नगरे गुजरात-टाईटंस्-दलं लखनऊ-सूपर-जाईन्ट्स-दलं सायं सार्धसप्तवादने सम्मुखीकरिष्यति ।

---------------------------------------

<u>प्रधानमन्त्री-बीकानेर</u>:

प्रधानमन्त्रिणा नरेन्द्रमोदिना सिंदूराभियानस्य सफलतायै भारतीय-सशस्त्र-बलानां प्रशंसा कृता अस्ति। तेन प्रोदीरितम् यत् तेषां पराक्रमेण पाकिस्तानः पराजयमुखम् अपश्यत् ।

श्रीमोदी अकथयत् यत् पाकिस्तानः भारते विहितेभ्यः आतङ्कगतिविधिभ्यः उत्तरदायि सम्भूय तन्निमितं मूल्यं दास्यति। सः प्रोक्तवान् यत् पाकिस्तानः कदापि भारतं विरुध्य जाते साक्षात्युद्धे विजेतुं न शक्नोति अतः तेन भारतं विरुध्य योद्धुं आतङ्कवादः शस्त्ररूपेण स्वीकृतः अस्ति । अवधेयं यत् श्रीमोदी अद्य राजस्थानस्य बीकानेरक्षेत्रं निकषा पलाना-क्षेत्रे षड्विंशति-सहस्र-कोटिरुप्यकाणां विभिन्न-विकास-परियोजनानां शिलान्यासम् उद्घाटनं च विधाय समारोहं संबोधयति स्म । श्रीमोदी प्रोक्तवान् यत् पाकिस्तानः स्वतन्त्रताप्राप्त्यानन्तरं निरन्तरं आतङ्कवादं तनोति परञ्च अधुनी एतादृशं कार्याचरणं विरुध्य पाकिस्तानः भीषणमूल्यं दास्यति यस्य वहनं तस्य सेनाः अर्थव्यवस्था च करिष्यति ।

श्रीमोदी अकथयत् अधुना पाकिस्तानेन सह व्यापाराविषयिकी कापि वार्ता न भविष्यति अपितु केवलं पाकिस्तानाधिकृतस्य कश्मीरस्य विषये एव वार्ता भविष्यति । सः प्रोक्तवान् यत् एषः सङ्कल्पः भारतस्य अस्ति अपि च विश्वस्य कापि शक्तिः एतं सङ्कल्पं विखण्डितुं न शक्नोति । श्रीमोदी प्रोक्तवान् यत् सिंदूराभियानेन आतंकवादस्य निवारणाय त्रयः सिद्धांताः निर्धारिताः । तेषु प्रथमः अस्ति - यदि भारते कीदृशोऽपि आतंकिप्रहारः भविष्यति तर्हि तद्विरुद्धं उचितोत्तरं प्रदास्यते ।

इतः पूर्वं बीकानेरस्य पलानाक्षेत्रे एकस्मिन् सार्वजनिक-कार्यक्रमे प्रधानमन्त्री नरेंद्रमोदी अकथयत् यत् अद्य देशनिर्माणाय षड्विंशति-सहस्र-कोटिरूप्यकाणां विविधविकास-परियोजनाः समर्पिताः सन्ति । विगतवर्षेषु देशे सुदृढाधारभूततन्त्र-निर्माणाय कृतानां कार्ययोजनानां विषये प्रकाशयन् प्रधानमन्त्री प्रोक्तवान् यत् आधुनिकमार्गाणां रेलविकासतन्त्राणां च निर्माणाय विविधाः पदक्षेपाः स्वीकृताः सन्ति ।

सः प्रोक्तवान् यत् अमृत-भारतम्, नमो-भारतम्, वंदे-भारतम् चेत्यादीनि रेलयान-सौविध्यानि देशस्य विकासगतिं प्रगतिं च अग्रे नयन्ति । सः प्रोक्तवान् यत् बुलेट-ट्रेन-परियोजना अपि विकासपथि प्रचलति अपि च सर्वकारः सम्पूर्णे देशे त्रयोदश-शतं रेल-स्थात्राणि अमृत-भारत-स्थात्राणां रूपेण पुनः विकसितुं कार्यं करोति । राजस्थानस्य बीकानेर-नगरे , प्रधानमंत्री नरेन्द्रमोदी अष्टादश-राज्याणां केंद्र-शासित-प्रदेशानां च षडशीति-जनपदेषु अवस्थितानां त्रयोत्तर-शतं पुनर्विकास-अमृत-स्थात्राणाम् उद्घाटनम् अकरोत्। एतानि स्थात्राणि एकादश-शत-कोटि-रुप्यकाणां व्ययेन विकसितानि सन्ति। त्रयोदशशततोऽधिकानां रेलस्थात्राणाम् पुनर्विकासकार्यं आधुनिक-सौविध्यैः सह क्रियते ।

-----------------------------------------

विदेशमन्त्रालयः-विवरणम्

भारतेन अद्य स्वकीयः सङ्कल्पः पुनरुच्चारितः अस्ति यत् भारत-पाकिस्तानयोः मध्ये कापि वार्ता द्विपक्षीया भवितव्या । विदेश-मंत्रालयस्य प्रवक्ता रणधीर-जायसवालः अद्य मध्याह्ने नव-दिल्ल्यां वार्ताहरान् अकथयत् यत् सम्वादः आतङ्कवादश्च परस्परं नैव भवितुं शक्नुतः । सः प्रोक्तवान् यत् नवदिल्ली तेषां उल्लेखनीयानाम् आतंकवादिनां भारतप्रत्यार्पण-विषये चर्चायै सज्जम् अस्ति, येषां सूचिः कानिचन् वर्षाणि पूर्वं पाकिस्तानाय प्रदत्ता आसीत्। सः प्रोक्तवान् यत्

जम्मू-कश्मीरस्य विषये कीदृशोऽपि द्वैपाक्षिक-सम्वादः केवलं पाकिस्तानेन अवैध-रूपेण अधिगृहीतस्य भारतीय-क्षेत्रस्य मुक्तिविषये एव भविष्यति । सिंधु-जल-संधिविषये, श्रीरणधीरः अकथयत् यत् एषा सन्धिः तावत् कालपर्यन्तं स्थगिता भविष्यति यावत् पाकिस्तानः विश्वसनीय-रूपेण अपरिवर्तनीय-रूपेण च सीम्नः पारं आतंकवादम् अधिकृत्य स्वकीयं समर्थनं च परित्यजति ।

-----------------------------------------

ऋतु-विज्ञान-विभागः

ऋतु-विज्ञान-विभागः दक्षिण-कोंकण-गोवा-महाराष्ट्र-तटीय-कर्नाटक-क्षेत्रेषु अतिभीषणवृष्ट्याः रेड-अलर्ट इति संचेतनां प्रकाशितवान्। आकाशवाण्या सह विशिष्ट-रूपेण सम्वादं कुर्वन्, ऋतु-विज्ञान-विभास्य वैज्ञानिकः डॉ आरके जेनामणि इत्यसौ प्रोक्तवान् यत् दक्षिण-कोंकण-गोवातटयोः पूर्वी-मध्य-अरब-सागर-क्षेत्रस्य ऊपरि निम्नदाबस्य क्षेत्रं तीव्रं भवितुं सम्भाव्यते। सः प्रोक्तवान् यत् आगामिषु दिवसत्रयेषु केरले मानसून इत्यस्य समारम्भावना अस्ति। डॉ. जेनामणिः प्रोक्तवान् यत् मानसूनः मईमासस्य सप्तविंशतिदिनाङ्कं यावत् पूर्वीयं भारतक्षेत्रं प्राप्स्यति ।

-----------------------------------------

सर्वदलीय-प्रतिनिधिमंडलम्:

जदयू दलस्य सांसदः सञ्जयकुमारझा इत्यस्य नेतृत्वे एकं बहुदलीय-प्रतिनिधिमंडलं अद्य टोक्यो-नगरे जापानस्य प्रमुख-विचारक-मण्डलेन सह वार्तां विहाय आतंकवादं विरुध्य भारतस्य शून्य-सहिष्णुतायाः विषये सूचनां प्रायच्छत्। स्वकीयायाः पञ्चदेशानां यात्रायाः प्रथमे चरणे टोक्योनगरं सम्प्राप्य प्रतिनिधिमंडलं राज्य-समर्थितं आतंकवादं समेत्य क्षेत्रीय-सुरक्षायाः विषये चर्चाम् अकरोत्। संवादात्मक-सत्रावधौ, प्रतिभागिभिः दुरापन्नतां विरुध्य भारतस्य युद्धम् अधिकृत्य दृढसमर्थनं व्यक्तीकृतम्। अस्मिन् एव मध्ये एकं भारतीय-सर्वदलीय-प्रतिनिधिमंडलम् अद्य प्रातः संयुक्त-अरब-अमीरात इत्यत्र अगच्छत् । एषः सिंदूराभियानान्तर्गतं एकः महत्वपूर्णः पदक्षेपः अस्ति।

-----------------------------------------

## मिसरी-जापानोपवेशनम्:

विदेश-सचिवः विक्रम-मिसरी अद्य जापानस्य विदेश-प्रकरणानां उप-मंत्रिणा ताकेहिरो-फुनाकोशी इत्यनेन सह टोक्यो-नगरे मेलनम् अकरोत्। विदेश-सचिव-उपमंत्रिणोः वार्तायां भागं भजता, श्रीमिसरी-वर्येण आतंकवादं विरुध्य भारतस्य शून्य-सहिष्णुतायाः संदेशः प्रदत्तः । चर्चायां भारत-जापानयोः मध्ये विशिष्ट-रणनीतिक-वैश्विक-सामञ्जस्यानां वरिवर्धनादि-विषयाः सम्मिलिताः आसन् । श्री-मिसरी-वर्यः जापानस्य वरिष्ठ-उप-विदेश-मंत्रिणा हिरोयुकी नमजु इत्यनेन सह अपि उपवेशनम् अकरोत् ।

-----------------------------------------

## आई-पी-एल्

आई-पी-एल् इति क्रिकेटद्वन्द्वे अद्य अहमदाबाद-नगरे गुजरात-टाईटंस्-दलं लखनऊ-सूपर-जाईन्ट्स-दलं सायं सार्धसप्तवादने सम्मुखीकरिष्यति ।

।। इति वार्ता: ।।